श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ नारायणसूक्तम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ नारायणसूक्तम् ॥

॥ हरिः ओं ॥ स॒ह॒स्र॒शीर्॑षं दे॒वं॒ वि॒श्वाक्षं॑ वि॒श्वशं॑भु॒वम्। विश्वं॑ ना॒राय॑णं दे॒वम॒क्षरं॑ पर॒मं प्र॒भुम्। वि॒श्वतः॒ पर॑मं नि॒त्यं॒ वि॒श्वं ना॑राय॒णग्ं ह॑रिम्। विश्व॑मे॒वेदं पु॒रु॑ष॒स्तद्वि॒श्व॒मुप॑जीवति। पतिं॒ विश्व॑स्या॒त्मेश्व॑र॒ग्ं॒ शाश्व॑तग्ं शि॒वम॑च्यु॒तम्। ना॒राय॒णं म॑हाज्ञे॒यं॒ वि॒श्वात्मा॑नं प॒राय॑णम्। ना॒राय॒णप॑रं ब्र॒ह्म॒ त॒त्वं ना॑राय॒णः प॑रः। ना॒राय॒ण प॑रो ज्यो॒ति॒रा॒त्मा ना॑राय॒णः प॑रः। यच्च॑ कि॒ञ्चिज्ज॑गत्य॒स्मि॒न्दृ॒श्यते᳚ श्रूय॒ते॒ऽपि॑ वा॥

अन्त॑र्ब॒हिश्च॑ तत्स॒र्वं॒ व्या॒प्य ना॑राय॒णः स्थि॑तः। अन॑न्त॒मव्य॑यं क॒विग्ं स॑मु॒द्रेऽन्तं॑ वि॒श्वशं॑भु॒वम्। प॒द्म॒ को॒शप्र॑तीका॒श॒ग्ं॒ हृ॒दयं॑ चाप्य॒धोमु॑खम्। अधो॑ नि॒ष्टया वि॑तस्त्यां॒ तु॒ ना॒भ्यामु॑परि॒ तिष्ठ॑ति। हृ॒दयं॑ तद्वि॑जानी॒याद्वि॒श्वस्या॑यत॒नं म॑हत्। सन्त॑तग्ं सि॒राभि॑स्तु॒ लम्ब॑त्या कोश॒सन्नि॑भम्। तस्यान्ते॑ सु॒षि॒रग्ं॒ सू॒क्ष्मं तस्मि᳚न् स॒र्वं प्रति॑ष्ठितम्। तस्य॒ मध्ये॑ म॒हान॑ग्निर्वि॒श्वार्चि॑र्वि॒श्वतो॑मु॒खः। सो॒ऽग्र॑भु॒ग्विभ॑जन्ति॒ष्ठ॒न्नाहा॑रमज॒रः क॒विः। स॒न्ता॒पय॑ति॒ स्वं दे॒हमापा॑दतल॒मस्त॑कम्। तस्य॒ मध्ये॒ वह्नि॑शिखा अ॒णीयो᳚र्ध्वा व्य॒वस्थि॑तः। नी॒लतो॑यद॑मध्य॒स्था॒ वि॒द्यु॒ल्ले॑खेव॒ भास्व॑रा। नी॒वा॒र॒शूक॑वत्त॒न्वी॒ पी॒ता भा᳚स्यात्त॒नूप॑मा। तस्या᳚श्शिखा॒या म॑ध्ये प॒रमा᳚त्मा व्य॒वस्थि॑तः। स ब्रह्मा॒ स शिव॒स्सेन्द्र॒स्सो॒ऽक्ष॑रः पर॒मस्स्व॒राट्॥

ऋ॒तग्ं स॒त्यं प॑रं ब्र॒ह्म॒ पु॒रुषं॑ कृष्ण॒पिङ्ग॑लम्। ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्षं॒ वि॒श्वरू॑पाय॒ वै नमः॑॥

ओं ना॒रा॒य॒णाय॑ वि॒द्महे॑ वासु॒दे॒वाय॑ धीमहि। तन्नो॑ विष्णुः॒ प्रचो॒दया᳚त्॥